# Shri Mahadeva Stuti

# श्रीमहादेवस्तुतिः २

## Document Information

Text title : Shri Mahadeva Stuti 02 47

File name : mahAdevastutiH2.itx

Category : shiva, stuti

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-47

Latest update : July 25, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 25, 2021

*sanskritdocuments.org*

# श्रीमहादेवस्तुतिः २

रुद्राय शितिकण्ठाय सुरूपाय सुवर्चसे ।
कपर्दिने करालाय हर्यक्ष्णे वरदाय च ॥ १॥

तृष्णे पूष्णे दशभिदे देवानामधिपाय च ।
क्षेम्या(य) हरिनेत्राय स्थाणवे पुरुषाय च ॥ २॥

हरिकेशाय मुण्डाय क्रोधायोत्तारणाय च ।
भास्वराय सुतीर्थाय देवदेवाय रंहसे ॥ ३॥

उष्णीषिणे सुवक्त्राय पशुहस्ताय पार्षिणे ।
हिरण्यबाहवे राजन्योग्राय पतये दिशाम् ॥ ४॥

पशूनां पतये चैव भूतानां पतये नमः ।
वृषाय मातृभक्ताय सेनान्ये मध्यमाय च ॥ ५॥

महात्मने चानङ्गाय सर्वाङ्गाय प्रमाथिने ।
तथा रुद्राणीपतये पृथवे कृत्तिवाससे ॥ ६॥

कपालभूषिणे नित्यं सुवर्णमकुटाय च ।
महादेवाय कृष्णाय त्र्यम्बकाय हराय च ॥ ७॥

क्रोधनायानृशंसाय मृत्यवे बाहुशालिने ।
दण्डिने दृप्ततपसे तथैवाक्रूरकर्मिणे ॥ ८॥

सहस्रशिरसे चैव सहस्रचरणाय च ।
विरूपाय सुरूपाय महारूपाय दंष्ट्रिणे ॥ ९॥

पिनाकिनं महादेवं महाभोगिनमव्ययम् ।
त्रिशूलपाणिं वरदं त्र्यम्बकं भुवनेश्वरम् ॥ १०॥

त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम् ।
प्रभवं सर्वभूतानां धातारं धरणीधरम् ॥ ११॥

ईशानं शङ्करं शर्वं शिवं विश्वेश्वरं भवम् ।
उमापतिं पशुपतिं विश्वरूपं महेश्वरम् ॥ १२॥

विरूपाक्षं दशभुजं विष्यद्वृङ्गं वृषध्वजम् ।
उग्रं स्थाणुं शिवं घोरं शर्वं गौरीशमीश्वरम् ॥ १३॥

शितिकण्ठमजं शुभ्रं पृथुं विधुहरं हरम् ।
विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ १४॥

प्रणम्य शिरसा देवं नागाङ्गदधरं हरम् ।
शरण्यं शरणं यामि महादेवं चतुर्मुखम् ॥ १५॥

विरोचमानं वपुषा दिव्याभरणभूषितम् ।
अनाद्यन्तमजं शम्भुं सर्वव्यापिनमीश्वरम् ॥ १६॥

निस्त्रैगुण्यं निरुद्योगं निर्मलं निधिमोजसाम् ।
प्रणम्य प्राञ्जलिः शर्वं प्रयामि शरणं हरम् ॥ १७॥

निष्कलं निर्मलं नित्यमकारणमलेपनम् ।
अध्यात्मवेदमासाद्य प्रयामि शरणं मुहुः ॥ १८॥

यस्य नित्यं विदुः स्थानं मोक्षमध्यात्मचिन्तकाः ।
योगीशं तत्त्वमार्गस्थाः कैवल्यपदमक्षरम् ॥ १९॥

यं विदुः सङ्गनिर्मुक्ताः सामान्यं समदर्शिनः ।
तं प्रपद्ये जगद्योनिमयोनिं निर्गुणात्मकम् ॥ २०॥

असृजद्यस्तु भूतादीन् सप्तलोकान् सनातनान् ।
स्थितः सत्योपरि स्थाणुं तं प्रपद्ये सनातनम् ॥ २१॥

भक्तानां सुलभं तं तु दुर्लभं दूरपातिनाम् ।
अदूरस्थममुं देवं प्रकृतेः परतः स्थितम् ।
नमामि सर्वलोकस्थं व्रजामि शरणं शिवम् ॥ २२॥

॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि संवर्तमरुत्तसंवादे
मञ्जवद्गिरिवासमहादेवस्तुतिर्नाम सप्तमाध्यायः सम्पूर्णः ॥

Proofread by Aruna Narayanan

*Shri Mahadeva Stuti*

pdf was typeset on July 25, 2021

Please send corrections to *sanskrit@cheerful.com*